# Yudhishthirakritam 1 Shri Krishna Stotram

# યુધિષ્ઠિરકૃતં ૧ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Yudhishthirakritam 1 Shri Krishna Stotram

File name : yudhiShThirakRRitaM1shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 124/5-18||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# યુધિષ્ઠિરકૃતં ૧ શ્રીકૃષ્ણસ્તોત્રમ્

ન તેષાં દુષ્કરં કિઞ્ચિત્ત્રિષુ લોકેષુ વિદ્યતે ।
સર્વલોકગુરુર્યેષાં ત્વં નાથો મધુસૂદન ॥ ૫॥

તવ પ્રસાદાદ્ગોવિન્દ વયં જેષ્યામહે રિપૂન્ ।
યથા પૂર્વં પ્રસાદાત્તે દાનવાન્પાકશાસનઃ ॥ ૬॥

પૃથિવીવિજયો વાપિ ત્રૈલોક્યવિજયોઽપિ વા ।
ધ્રુવો હિ તેષાં વાર્ષ્ણેય યેષાં તુષ્ટોઽસિ માધવ ॥ ૭॥

ન તેષાં વિદ્યતે પાપં સઙ્ગ્રામે વા પરાજયઃ ।
ત્રિદશેશ્વરનાથસ્ત્વં યેષાં તુષ્ટોઽસિ માધવ ॥ ૮॥

ત્વત્પ્રસાદાદ્ધૃષીકેશ શક્રઃ સુરગણેશ્વરઃ ।
ત્રૈલોક્યવિજયં શ્રીમાન્પ્રાપ્તવાન્ રણમૂર્ધનિ ॥ ૯॥

તવ ચૈવ પ્રસાદેન ત્રિદશાસ્ત્રિદશેશ્વર ।
અમરત્વં ગતાઃ કૃષ્ણ લોકાંશ્ચાશ્નુવતેઽક્ષયાન્ ॥ ૧૦॥

ત્વત્પ્રસાદસમુત્થેન વિક્રમેણારિસૂદન ।
સુરેશત્વં ગતઃ શક્રો હત્વા દૈત્યાન્સહસ્રશઃ ॥ ૧૧॥

ત્વત્પ્રસાદાદ્ધૃષીકેશ જગત્સ્થાવરજઙ્ગમમ્ ।
સ્વવર્ત્મનિ સ્થિતં વીર જપહોમેષુ વર્તતે ॥ ૧૨॥

એકાર્ણવમિદં પૂર્વં સર્વમાસીત્તમોમયમ્ ।
ત્વત્પ્રસાદાત્પ્રકાશત્વં જગત્પ્રાપ્તં નરોત્તમ ॥ ૧૩॥

સ્રષ્ટારં સર્વલોકાનાં પરમાત્માનમચ્યુતમ્ ।
યે પ્રપન્ના હૃષીકેશં ન તે મુહ્યન્તિ કર્હિચિત્ ॥ ૧૪॥

અનાદિનિધનં દેવં લોકકર્તારમવ્યયમ્ ।
ત્વાં ભક્તા યે હૃષીકેશ દુર્ગાણ્યતિતરન્તિ તે ॥ ૧૫॥

પરં પુરાણં પુરુષં પુરાણાનાં પરં ચ યત્ ।
પ્રપદ્યતસ્તં પરમં પરા ભૂતિર્વિધીયતે ॥ ૧૬॥

યોઽગાત ચતુરો વેદાન્યશ્ચ વેદેષુ ગીયતે ।
તં પ્રપદ્ય મહાત્માનં ભૂતિમાપ્નોત્યનુત્તમામ્ ॥ ૧૭॥

ધનઞ્જયસખા યશ્ચ ધનઞ્જયહિતશ્ચ યઃ ।
તં ધનઞ્જયગોપ્તારં પ્રપદ્ય સુખમેધતે ॥ ૧૮॥

ઇતિ મહાભારતે દ્રોણપર્વણિ ૧૨૪ અધ્યાયાન્તર્ગતં
યુધિષ્ઠિરકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । દ્રોણપર્વ । અધ્યાય ૧૨૪/૫-૧૮॥

mahAbhArata . droNaparva . adhyAya 124/5-18..

Proofread by PSA Easwaran

---

*Yudhishthirakritam 1 Shri Krishna Stotram*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*